श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्वेङ्कटशेषार्यानुगृहीतं

# ॥ श्रीकोदण्डपाणिसुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

*The printed source of this stotra (Mañju Rāmāyaṇa, Nadādūr Trust, pp. 70–71) contains numerous typographical errors. A best attempt has been made to correct them.*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकोदण्डपाणिसुप्रभातम् ॥

वन्दे वेङ्कटशेषार्यं वत्सवंशशिरोमणिम्।
वात्स्यश्रीवरदाचार्यतनयं करुणानिधिम्॥

श्रीरामचन्द्र करुणावरुणालय श्री -
सीतामुखाम्बुजविकासक बालसूर्य !।
सौमित्रिमित्रभरताभिरताप्तमित्र -
शत्रुघ्न हे रघुपते ! तव सुप्रभातम्॥ 1 ॥

भास्वानुदेति विकचानि सरोरुहाणि
पश्य स्मरन् मधुरकूजितषद्पदानि।
त्वद्वीक्षणोन्मिषितनाभिसरोजवेधो -
वेदध्वने रघुपते ! तव सुप्रभातम्॥ 2 ॥

त्वां बोधयन्ति परितः श्रुतयः श्रुतीनां
सारेण सानुज ! भवत्प्रतिबोधकेन।
श्लोकेन कौशिकमुखोद्गलितेन कर्ण -
पीयूषवद्रघुपते ! तव सुप्रभातम्॥ 3 ॥

त्वां बोधयन्ति विबुधाः श्रुतिभोग्यवेणु -
वीणामृदङ्गपणवादितानुवादैः।
स्तोत्रैर्धरासुरवरस्तुतिघोषमित्रै -
राकर्ण्यतां रघुपते ! तव सुप्रभातम्॥ 4 ॥

उद्यानवासरसिकाः शुकशारिकाद्या
हृद्या हरे हरिरिति द्विजघोषहृद्यैः।
हृद्यां मुदं विदधतीह तवापदान -
पद्यैर्द्विजा रघुपते ! तव सुप्रभातम्॥ 5॥

ब्रह्मा शिवश्शतमखश्च मखाशनौघैः
त्वद्धामगोपुरभुवि प्रतिपालयन्ति।
त्वत्पादपङ्कजसिषेविषवोऽविशेषं
भक्तैर्द्विजै रघुपते ! तव सुप्रभातम्॥ 6॥

सूर्येन्दुसन्निधिवशादिव देवसङ्घैः
सोत्फुल्लवक्त्रकमलाञ्जलिकुड्मलौघैः।
मन्दारसुन्दरकरैः प्रतिपाल्यतेऽर्चा -
बद्धादरै रघुपते ! तव सुप्रभातम्॥ 7॥

तीर्थाभिषेकपरिशुद्धधियोऽर्चकास्ते
पूर्णाभिषेककलशाः परिचारकाश्च।
स्तुत्वा भवन्तमभिषेकमुखोपचार -
चर्योत्सुका रघुपते ! तव सुप्रभातम्॥ 8॥

सीतामुखेन्दुसविधेऽपि सदा प्रसन्नं
मन्दस्मितेन मधुरं सुधयेव लोकैः।
लम्बालकालिललितं तव वक्त्रपद्मं
संशोभतां रघुपते ! तव सुप्रभातम्॥ 9॥

श्रीकोसलेश्वरपुराकृतभाग्यराशे !
श्रीकोसलेन्द्रतनयानयनाभिराम !।
साकेतसाधुकुलकाङ्क्षितकल्पकश्रीः !
सीतामनोहरमणे ! तव सुप्रभातम्॥ 10॥

उद्दण्डशौण्डभुजखण्डितखण्डपर्शु -
    कोदण्डचण्डरवपिण्डितसाण्डजाण्ड !।
कोदण्डदण्डवरमण्डितबाहुदण्ड !
    श्रीखण्डचर्चिततनो ! तव सुप्रभातम् ॥ **11** ॥

इत्थं वेङ्कटशेषेण सुप्रभातस्तुतिः कृता।
श्रीरामचरणाम्भोजयुगभूषा समर्पिता ॥ **12** ॥

नीलोत्पलानि सरसीष्विह सङ्कुचन्ति
    सापत्रपाणि तव दृक्कुलयोर्विलासे।
धामानि ते च विकचानि सरोरुहाणि
    श्रीरामचन्द्रदयिते ! तव सुप्रभातम् ॥ **13** ॥

प्रातस्सुवर्णमणिदर्पणनायिकास्य -
    वीक्षां वदन्ति सुधियः शुभमेव पत्युः।
सर्वं त्वदाननविलोकनतोऽस्य सिध्येद्
    उत्तिष्ठ मैथिलसुते ! तव सुप्रभातम् ॥ **14** ॥

॥ इति श्रीकोदण्डपाणिसुप्रभातं समाप्तम् ॥